# नामधेयेन किं फलम्

आसीत् पुरा तक्षशिला नाम नगरी। नगर्यां नस्यां कश्चित् विद्वान् आचार्यः अवर्तत्। तस्य बहवः शिष्याः। पापकः नाम तेषु एकः अभवत्।

पापकः इति स्वकीयनामधेयं तस्मै नारोचत, यतः तस्य सहाध्यायिनः ’अरे पापक, अरे दुष्ट’ इति सततमुक्त्वा तं पीडयन्ति स्म।

एकदातीव पीडितः सः गुरुमागत्य अभाषत, ’आचार्य, मह्यं मम नामधेयं न रोचते, अपरं शोभनार्थाभिधानं यच्छतु भवान् मह्यम्’ इति।

त्वमेव देशान्तरं गत्वा किमपि प्रियं नामधेयम् अन्विष्य आगच्छ। तदेव तव नाम प्रसिध्दं भवेत् इति गुरुणा आदिष्टः सः।

तथेत्युक्त्वा, पाथेयं गृहित्वा पापकः यात्राम् आरभत। प्रथममेव शवं गृहित्वा श्मशानं गच्छतः जनान् अवलोक्य ’कोऽयं मृतः’ इति कुतूहलेन अपृच्छत्। ”अस्माकं ’जीवकः’ नाम वयस्यः मृतः”, इति तेभ्यः आकर्ण्य विस्मितः सः मनस्यकरोत्, यद्यपि एतस्य नामधेयं ’जीवकः’ तथापि एषः मृतः। कथमेतत् संभवेत् इति।

अनन्तरं काचिद् दीना वनिता विलोकिता तेन। सा च निर्जने अरण्ये रोदिति स्म। पापकेन सा पृष्टा। ”का त्वं ? किमर्थं रोदिषि ?” तदा सा अकथयत्, ”धनपाली नाम दासी अहम्। वृध्दवस्थायां मम समीपे किञ्चिदपि धनं नास्ति। दरिद्रा अहं कथमन्नं लभेय इति रोदिमि”। अभिधानं तु ’धनपाली’, तथापि निर्धना, आश्चर्यं खलु एतत् इति सः व्यमृशत्।

तदनन्तरं सः कञ्चन संभ्रान्तं पुरुषं दृष्टवान्। मार्गात् भ्रष्टः सः स्वमार्गम् अन्विष्यन् इतस्ततः परिभ्रमति स्म। ”कः त्वम् ? कुतः परिभ्रम्यते

त्वया ?" इति पृष्टे सः अकथयत् "पथकः इत मम नामधेयम् इदानिं तु अहमेव इष्टमार्गं नावगच्छामि।"

एतस्य नाम तु 'पथकः' स्वयमेव मार्गं न जानाति इति विस्मितः सः प्रत्यागत्य गुरुं प्रणम्य अवदत्, "आचार्य, मार्गे मया 'जीवकः' मृतः दृष्टः, 'धनपाली' निर्धना अवलोकिता, पथकः च अनभिज्ञामार्गः। अतः सम्यक् ज्ञातं मया यत् पुरुषः एव गुणवान्, दोषवान् वा भवति, न तस्य नाम्नि कोऽपि गुणः दोषः वा वर्तते। केवलं नामधेयेन किं फलम् ?"